## सप्तदशः पाठः

# गुरुभक्तः आरुणिः

"श्रद्धावान् लभते ज्ञानम्" इति कथनानुसारं श्रद्धालुः शिष्यः एव गुरोः सकाशात् ज्ञानं प्राप्नोति। न केवलं बुद्धिः अपितु आसक्तिः अपि ज्ञानं सम्पादयितुम् आवश्यकी वर्तते। उपनिषत्सु अनेकानि उदाहरणानि श्रद्धायाः महत्त्वं निरूपयन्ति। आरुणेः चरित्रमपि गुरुभक्तेः उदाहरणं वर्तते।

**शिक्षकः** – (छात्रान् प्रति) श्वः किं पर्व अस्ति ?

**रुचिरा** – महोदय! श्वः गुरुपूर्णिमा-पर्व अस्ति।

**प्रसूनः** – गुरुपूर्णिमा पर्वणि किं भवति ?

**शिक्षकः** – अस्मिन् पर्वणि गुरुजनानां पूजनं सम्माननञ्च भवति। लोके आरुणिः, एकलव्यः, उपमन्युः इत्यादयः गुरुभक्तिं कृत्वा प्रसिद्धिं गताः।

**अक्षतः** – गुरुवर्य! आरुणिः कः आसीत् ?

**शिक्षकः** – शोभनम्, शृणोतु! आसीत् कश्चिद् ऋषिः धौम्यो नाम आयोदः। तस्य शिष्यः आसीत् आरुणिरिति।

**प्रज्ञा** – तेन गुरोः कीदृशी सेवा कृता ?

**शिक्षकः** – शृणोतु, ऋषि धौम्यः आरुणिं पाञ्चाल्यं प्रेषयति स्म-गच्छ, केदारखण्डं बधान इति। उपाध्यायेन आदिष्टः आरुणिः तत्र गतवान् परञ्च केदारखण्डं बद्धुं नाशक्नोत्।

**मयङ्कः** – तदनन्तरं स किमकरोत् ?

**शिक्षकः** – कष्टमनुभवन् स अचिन्तयदुपायम्-भवतु एवमहं करिष्यामीति। इति विचिन्त्य स तत्केदारखण्डे आत्मानं संविवेश। शयाने तस्मिन् तदुदकप्रवाहः विरराम। ततः परं बहुकालानन्तरमुपाध्यायः आयोदो धौम्यः शिष्यानपृच्छत्- "क्व आरुणिः पाञ्चाल्य गत इति।" ते प्रत्यवदन् भगवतैव प्रेषितः। बहुकालगतेऽपि स न प्रत्यागतः।

**अक्षतः** – तदा धौम्यः आरुणेः अन्वेषणाय प्रयत्नं न कृतवान् किम् ?

**शिक्षकः** – अवश्यमेव, यदा आरुणिः न प्रत्यागच्छत् तदा चिन्तितः सशिष्यैः ऋषिः तत्र गतवान् यत्र स आरुणिः गतः। तत्र तमाह्वानाय उच्चैः शब्दं चकार-भो आरुणे! क्वासि वत्स ? क्वासि ? एतच्छ्रुत्वा स तस्मात् केदारखण्डात् सहसोत्थाय ऋषिसमीपं प्रत्यागच्छत्। प्रत्यवदच्चैनम् अयमस्मि अत्र केदारखण्डे, अहं निस्सरदुदकमवारणीयं संरोद्धुं संविष्टः। भवच्छब्दं श्रुत्वा केदारखण्डं विदार्य समुपस्थितः। तदभिवादये भवन्तम्। आज्ञापयतु भवान् किमिदानीं करवाणीति।

**रुचिरा** – स गुरुणा पुरस्कृतः किम् ?

**शिक्षकः** शृणोतु! तमुपाध्यायोऽब्रबीत् – "यं केदारखण्डमवदार्य त्वमुपस्थितः, तस्मात् त्वमुद्दालक इति नाम्ना भविष्यतीति।" यस्मात् त्वया मद्वचनं अनुष्ठितं तस्मात् श्रेयोऽवाप्स्यसीति!

ते सर्वे वेदाः प्रतिभास्यन्ति, सर्वाणि च शास्त्राणीति। अनेन स गुरुभक्तः आरुणिः उद्दालक नाम्ना प्रसिद्धो विद्वान् शास्त्रज्ञो यशस्वी दीर्घायुश्चाजायत।

**प्रसूनः** – अस्माभिरपि गुरुजनानामाज्ञा पालनीया।

**शिक्षकः** – आम्, अवश्यमेव।

## शब्दार्थः

केदारखण्डम् – खेत की क्यारी को, उदकम् – पानी को, अन्वेषणाय – खोजने के लिए, आह्वानाय – बुलाने के लिए, विदार्य – तोड़कर

## अभ्यासः

### (1) एकपदेन उत्तरं लिखत –

(क) आरुणेः गुरोः नाम किम् ?

(ख) गुरुपूर्णिमायां केषां पूजनं भवति ?

(ग) आरुणेः अपरं नाम किं जातम्?

(घ) आरुणिः कुत्र संविवेश?

### (2) एकवाक्येन उत्तरं लिखत –

(क) गुरुः आरुणिं पाञ्चाल्यं किमर्थं प्रेषयति स्म ?

(ख) गुरोः आदेशेन आरुणिः किमकरोत् ?

(ग) आरुणिः गुरोः शब्दं श्रुत्वा किं कृतवान् ?

(घ) धौम्यः शिष्याय किमाशीर्वादम् अददात् ?

### (3) उचितशब्देन रिक्तस्थानानि पूरयत –

(क) तस्य शिष्यः आरुणिः . . . . . . . . . . . . . .। (आसन् / आसीत्)

(ख) उपाध्यायः धौम्यः . . . . . . . . . . . . . . अपृच्छत्। (शिष्यान् / शिष्यैः)

(ग) भवान् उद्दालक इति नाम्ना . . . . . . . . . . . . . .। (भविष्यति / भविष्यसि)

(घ) अहमभिवादये . . . . . . . . . . . . . . । (भवान् / भवन्तम्)

(ङ) ते . . . . . . . . . . . . . . वेदाः प्रतिभास्यन्ति। (सर्वे/ सर्वान्)

### (4) शुद्धकथनानां समक्षम् ''आम्'' अशुद्धकथनानां समक्षं ''न'' इति लिखत –

(क) आरुणिः महान् पितृभक्तः आसीत्। ☐

(ख) धौम्यः आरुणिम् आह्वानाय शब्दं चकार। ☐

(ग) आरुणिः गुरोः आज्ञया केदारखण्डं प्रति गतवान्। ☐

(घ) आरुणिः उद्दालकनाम्ना प्रसिद्धः। ☐

**( 5 ) निम्नलिखितैः अव्ययशब्दैः वाक्यानि रचयत –**

(क) श्वः – ----------------------।

(ख) तत्र – ----------------------।

(ग) यत्र – ----------------------।

(घ) बाढम् – ----------------------।

(ङ) क्व – ----------------------।

**( 6 ) क्रियापदानां धातुं लकारं पुरुषं वचनं च लिखत –**

| क्रियापदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| प्रेषयति | ------- | ------- | ------- | ------- |
| अशक्नोत् | ------- | ------- | ------- | ------- |
| प्रत्यवदन् | ------- | ------- | ------- | ------- |
| गच्छ | ------- | ------- | ------- | ------- |
| आज्ञापयतु | ------- | ------- | ------- | ------- |
| अजायत | ------- | ------- | ------- | ------- |
| करवाणि | ------- | ------- | ------- | ------- |
| बधान | ------- | ------- | ------- | ------- |

**( 7 ) निम्नलिखितशब्दानां सन्धिविच्छेदं कृत्वा सन्धेः नाम लिखत –**

| शब्दः | सन्धिविच्छेदः | सन्धेः नाम |
|---|---|---|
| कश्चित् | --------- | --------- |
| तदुदकम् | --------- | --------- |
| प्रत्यवदच्चैनम् | --------- | --------- |
| एतच्छ्रुत्वा | --------- | --------- |
| अस्माभिरपि | --------- | --------- |

## ( 8 ) निम्नलिखितशब्दानां धातुं प्रत्ययं च विभज्य लिखत –

| शब्दः | धातुः | प्रत्ययः |
|---|---|---|
| **गत्वा** | **गम् ( गच्छ् )** | **क्त्वा** |
| आगतः | - - - - - - - - - | - - - - - - - - - |
| चिन्तितः | - - - - - - - - - | - - - - - - - - - |
| गतवान् | - - - - - - - - - | - - - - - - - - - |
| श्रुत्वा | - - - - - - - - - | - - - - - - - - - |
| बद्धुम् | - - - - - - - - - | - - - - - - - - - |
| विदार्य | - - - - - - - - - | - - - - - - - - - |

## ( 9 ) निम्नलिखितशब्दानां मूलशब्दं विभक्तिं वचनं लिङ्गं च लिखत –

| शब्दः | मूलशब्दः | विभक्तिः | वचनम् | लिङ्गम् |
|---|---|---|---|---|
| पर्वणि | - - - - - - - | - - - - - - - | - - - - - - - | - - - - - - - |
| शिष्यान् | - - - - - - - | - - - - - - - | - - - - - - - | - - - - - - - |
| तस्मात् | - - - - - - - | - - - - - - - | - - - - - - - | - - - - - - - |
| नाम्ना | - - - - - - - | - - - - - - - | - - - - - - - | - - - - - - - |
| सर्वे | - - - - - - - | - - - - - - - | - - - - - - - | - - - - - - - |
| अस्माभिः | - - - - - - - | - - - - - - - | - - - - - - - | - - - - - - - |
| इयम् | - - - - - - - | - - - - - - - | - - - - - - - | - - - - - - - |

## ( 10 ) निम्नलिखितवाक्यानि कथानुसारेण क्रमेण लिखत –

(क) शयाने तस्मिन् प्रवाहः विरराम।

(ख) स तत्र संविवेश केदारखण्डे।

(ग) तदभिवादये भवन्तम्।

(घ) गुरुजनानामाज्ञा पालनीया।

(ङ) तस्य शिष्यः आसीत् आरुणिरिति।

### योग्यताविस्तारः –

- गुरुभक्तः आरुणिः इमं पाठं कथारूपेण लिखत।
- गुरुभक्तिविषये अन्ये के कथञ्च प्रसिद्धिं गताः ? इति अन्विष्य लिखत।

❖ ❖ ❖